…शालां ददर्श…धूम्रामगरु( v. l. °गुरु )धूपेन Rāmā. v. 7. 24; सदा चन्दनधूपेन सान्निध्यं कुरुते रविः ।…तथैवागुरुधूपेन BhaviP. 289A. 15 (i. 196. 18); अपराकरोद-गुरुधूपमग्रतः Raghunā. 4. 12.

**अगुरुधूपगन्धिन्** ( agurudhūpa–gandhin ) *adj.* scented with aromatic vapour of aloe wood अगुरुधूपगन्धिभिः…जहुः…निवसनैः सुमध्यमाः RaghuVa. 19. 41.

**अगुरुधूपज** (agurudhūpa–ja) *adj.* (smoke) arising from the incense of (the resin of) aloe–wood वातायनैरगुरुधूपजधूमलेखनिर्याणलिप्तशिखरैर्विबभुर्गृहाणि HarVi. 19. 65.

**अगुरुधूपधूपित** ( agurudhūpa–dhūpita ) *adj.* perfumed with the incense of (the resin of) aloe-wood सा…अगुरुधूपधूपितम्…वारि धारात्मना पातयाम्बभूव DaśKuC. 112. 10.

**अगुरुधूपधूम** ( agurudhūpa–dhūma ) *m.* the fume of the incense of (the resin of) aloe-wood प्रियागुरुधूपधूमोद्गमनिवातवलभिगर्भे…देवदिशः परिसर्पति हैमने मरुति YaśasCam. i. 575. 6.

**अगुरुधूपपरिमल** ( agurudhūpa–parimala ) *adj.* fragrant with the incense of (the resin of) aloe-wood ( राजा ) अतिबहलागुरुधूपपरिमलम्…आस्थानमण्डपमयासीत् Kād. 17. 9.

**अगुरुधूपित** ( aguru–dhūpita ) *adj.* [ *f.* –ā] fumigated or perfumed with the incense of ( the resin of ) aloe-wood राजमार्गं ययौ रामो मध्येनागरु( v. l. °गुरु )धूपितम् Rāmā. ii. 15. 2; ( शीते ) कुङ्कुमेन सदर्पेण प्रदिग्धोऽगुरुधूपितः AṣṭāHṛ. i. 3. 11; मयादयः । … कर्पूरागुरुधूपिताः BṛKathā-Mañ. vi. 1. 129; सः …कर्पूरागुरुधूपिते । … शय्यागृहे … उपविष्टः BṛKathāMañ. 16. 44; मनोज्ञामगुरुधूपिताम्…शालां कारयेत् Hastyāyur. 688. 15 (4. 28)

**अगुरुधूम** ( aguru–dhūma ) *m.* fume or smoke of the incense of (the resin of) aloe–wood न हि युगपदविद्यमानयोरेकेन इतरस्य वासना सम्भवति, सहभुवामेवाङ्गारागुरुधूमादीनां वास्यवासकभावदर्शनात् NyāyRa. 261. 15 ( *on* 5(2). 187); केशाञ्जम्बूकुमारस्य गन्धकार्योऽध्यवासयन् । कर्पूरागुरुधूमेन PariPar. 2. 142.

**अगुरुधूमजाल** ( agurudhūma–jāla ) *n.* network of fumes or smoke of the incense of (the resin of) aloe-wood जालानि यत्रागुरुधूमजालैः … । अवासयन्…नाकसदां विमानान् Yādavā. 11. 45.

**अगुरुधूमभर** ( agurudhūma–bhara ) *m.* mass or column of the fumes or smoke of the incense of (the resin of) aloe-wood उररीचकार सुरवारवधूच्चिकुरोत्करानगुरुधूमभरः S'rīKaC. 13. 30.

**अगुरुपङ्क** ( aguru–paṅka ) *m.* paste or unguent of aloe घनैरगुरुपङ्कैश्च । …मारुतप्रबलः शीघ्रं प्रशाम्यति मदात्ययः CaraS. vi. 24. 133 (1941 Ed.); (चन्द्रः) संवादमेष्यति ममागुरुपङ्कदिग्धपत्रावलीशबलगण्डपुरन्ध्रिवक्त्रैः HarVi. 20. 26.

**अगुरुपङ्कपत्त्रभङ्ग** (agurupaṅka–pattrabhaṅga) *m.* ornamental streaks or motifs drawn (on the face) with aloe-paste कमलदृशोऽगुरुपङ्कपत्त्रभङ्गः । व्यगलदतनुबाष्पपातभिन्नः HarVi. 28. 104.

**अगुरुपङ्काङ्क** (agurupaṅkāṅka) *m.* mark of aloe-paste (cf. **अगरुपङ्काङ्क**) क्वचिदगुरुपङ्काङ्कमलिनः…स्त्रियः सर्वावस्थं कथयति रतं प्रच्छदपटः Subhāṣi. 2131.

**अगुरुपत्त्रवल्ली** ( aguru–patttravallī ) *f.* ornamental design made (on the face) with aloe-paste स्थूलाश्रुधारापतनानुबन्धप्रमृष्टिसंजातभयेव तन्व्याः । गण्डार्पिते संप्रति पाणिपद्मे न भाति लग्नागुरुपत्त्रवल्ली HarVi. 25. 21.

[1]**अगुरुपरिमिलित** ( aguru–parimilita ) *adj.* smeared with aloe-paste तत्र च…अपरे पाण्डवा इव दिव्यचक्षुःकृष्णागुरुपरिमिलिताः ( राजपुत्राः ) VāsaDa. 143. 1.

[2]**अगुरुपरिमिलित** ( a–guruparimilita ) *adj.* not accompanied or guarded by the elders तत्र च…अपरे पाण्डवा इव दिव्यचक्षुःकृष्णागुरुपरिमिलिताः VāsaDa. 143. 1 ( comm. वृद्धरक्षणरहिताः )

**अगुरुपवन** ( aguru–pavana ) *n.* emission of the (fume of the) incense of aloe वायुः … लिखत्यानने दिग्वधूनां धूमोद्गारैरगुरुपवनैः … पत्रभङ्गान् SubhāRaK. 9. 6.

**अगुरुपादप** ( aguru–pādapa ) *m.* the aloe-tree, *Aquilaria agallocha* वृतम्…गुग्गुलैश्चन्दनैर्वृक्षैस्तथैवागुरुपाटलैः ( v. l. °पादपैः ) । …ददर्श स महीपालः स्थानम् BrahmP. 44. 62.

**अगुरुपूरित** ( aguru–pūrita ) *adj.* filled with or consisting of (the fragrant) aloe wood ददौ … रत्नकाञ्चनसद्वस्त्रकर्पूरागुरुपूरितैः । भारैर्भृतानामुष्ट्राणां सहस्राण्यपि पञ्च सः KathāSaSāg. viii. 1. 132.

**अगुरुप्रभव** ( aguru–prabhava ) *adj.* ( oil ) extracted from aloe-wood अगुरुप्रभवः स्नेहः कृष्णागुरुसमः स्मृतः BhāvPra.(Bhā.) 6(3). 23.

**अगुरुप्रयुक्त** ( a–guruprayukta ) *adj.* not ordered or permitted by the preceptor नापोऽभ्यवयन्त्यूर्ध्वं जानुभ्यामगुरुप्रयुक्ताः ( आदित्यव्रतचारिणः ) GobhiGS. iii. 1. 33.

**अगुरुप्राप्ति** ( aguru–prāpti ) *f.* obtainment of aloe–wood (शकुनिदर्शने) दर्शनं वातरोगिणां चन्दनागुरुप्राप्तिः BṛSaṁ. 87. 11.

**अगुरुप्रिय** ( aguru–priya ) *adj.* fond of aloe ( वर्षासु ) साग्नियानं च भवनं निर्दंशमशकोन्दुरम् । प्रघर्षोद्वर्तनस्नानधूमगन्धागुरुप्रियः । यायात् AṣṭāSaṁ. i. 17. 10 (1. 4)

**अगुरुफल** ( a–guruphala ) *adj.* not bearing big (or heavy) fruit कलौ सदा । वृक्षा यथाऽगुरुफलाः पुत्राश्च गुरुतर्जकाः ĀdiP. 3. 20.

**अगुरुभव** ( aguru–bhava ) *adj.* arising from aloe-wood इतरेन्धनजन्मा यो धूमः सोऽगुरुभवो धूपः AryāSaS'a. 13 = S'ārṅgPa. 466.

**अगुरुभूषित** ( aguru–bhūṣita ) *adj.* decorated with aloe-paste ( रामवेश्म ) चन्दनागुरुधूपितम् ( v. l. °भूषितम् ) । गन्धान्मनोज्ञान्विसृजद्दार्दुरं शिखरं यथा Rāmā. ii. 300*(1); नाराजके जनपदे चन्दनागुरुरूषिताः ( v. l. °भूषिताः ) । राजपुत्रा विराजन्ते Rāmā. ii. 1566*(7)

**अगुरुमत्त्व** ( agurumat–tva ) *n.* state of having a light or short (not heavy, not long) syllable द्विवचनबहुवचनयोर्गुणाभावादगुरुमत्त्वाभावाद्विकल्पः सावकाशः Pradī. iii. 83A. 19 (*on* iii. 1. 36)

**अगुरुमय** ( aguru–maya ) *adj.* made of aloe-paste परिवर्तुलोऽगुरुमयस्तिलकः…लिखितः S'rīKaC. 13. 15.

**अगुरुमिश्र** ( aguru–miśra ) *adj.* mixed with aloe-paste कर्पूरागुरुमिश्रेण चन्दनेन व्यलिप्यत PāṇḍaC. 16. 73.

**अगुरुमुखाभ्यास** ( a–gurumukhābhyāsa ) *m.* study without oral instruction of the teacher श्रवणस्यापि … गुरुनिरूप्यत्वादगुरुमुखाभ्यासव्यावृत्तिः Nyāyāmṛ. 624A. 9.

**अगुरुयुत** ( aguru–yuta ) *adj.* [ *f.* –ā] mixed with aloe-paste कस्तूरीं वरकुङ्कुमागुरुयुतामुष्णाम्बुशौचं तथा…सेवेत हेमन्तके BhāvPra.(Bhā.) 5. 351.

**अगुरुरस** ( aguru–rasa ) *m.* extract of aloe-wood अगुरुरसांस्तैलरसान् पुष्परसान्…श्रीराधिकया सह रसिकानन्दः संसेवमानो भवति SāmaraU. 225. 21; दश वायवोऽगुरुरससंपूर्यमाणा भवन्ति SāmaraU. 233. 20; 264. 6; तिलकं यदलिख्यतागुरुरसेन सकृत् SrīKaC. 13. 6.

**अगुरुरूषित** ( aguru–rūṣita ) *adj.* besmeared with the unguent of aloe-wood नाराजके जनपदे चन्दनागुरुरूषिताः । राजपुत्रा विराजन्ते Rāmā. ii. 1566*(7)

**अगुरुलघुक** ( a–gurulaghuka ) *adj.* neither heavy nor light अगुरुलघुकगुणषड्वृद्धिहानिरूपेण प्रतिक्षणं प्रवर्तमाना अर्थपर्यायाः TātpaVṛ. 101. 18; अनन्तज्ञानसुखादिविशेषगुणेभ्यस्तथैवागुरुलघुकादिसामान्यगुणेभ्यश्चाभिन्नत्वाद्गुणात्मकं भवति सिद्धजीवद्रव्यम् TātpaVṛ. 121. 12; अगुरुलघुकगुणषड्वृद्धिहानिरूपाः साधारणस्वभावगुणपर्यायाः TātpaVṛ. 121. 16.

**अगुरुलेपन** ( aguru–lepana ) *n.* anointing with the unguent of aloe-wood पुष्पताम्बूलकर्पूरचन्दनागुरुलेपनैः S'ivaP. i. 9. 4; SkandP. iii(3). 20. 34.

**अगुरुवत्** ( aguru–vat ) *adv.* like aloe-wood चन्दनागुरुवच्च तेषां गुणाः ( तैलपर्णिकादीनाम् ) ArthS'ā. i. 190. 7 (2. 11) ( comm. चन्दनवद् गुणा एकादश लघुत्वादयः अगुरुवद् गुणा अष्टौ गुरुत्वादयः )

**अगुरुवन** ( aguru–vana ) *n.* grove of aloe trees संसक्तैरगुरुवनेषु साङ्गहारम् । संप्रापे निसृतमदाम्बुभिर्गजेन्द्रैः प्रस्यन्दिप्रचलितगण्डशैलशोभा Kirātā. 7. 37.

**अगुरुवर** ( aguru–vara ) *m.* the best variety of aloe wood, the black aloe wood अगुरुवरः कृष्णागुरुः JñātāDhaṬ. 233B. 13.

**अगुरुवासित** ( aguru–vāsita ) *adj.* scented with aloe-paste प्रथममगुरुवासितकबरीसुगोप्यमानानि मन्दारपारिजातपुष्पाणि शोभायमानान्यातन्वन् SāmaraU. 264. 19.

**अगुरुवृक्ष** ( aguru–vṛkṣa ) *m.* aloe tree वायसोऽगुरुवृक्षे च श्रीवासध्वाङ्क्षयोः पुमान् Med. 187. 38.

**अगुरुशिंशपा** ( aguruśiṁśapā ) *f.* *Dalbergia sisu* पिच्छिलागुरुशिंशपा AmaK. 773 = AnekāK. 842; कपिलागुरुशिंशपा AnekāK. 837.

**अगुरुषट्क** ( aguru–ṣaṭka ) *n.* six short or light syllables प्रथममगुरुषट्कं विद्यते यत्र…मालिनी सा S'rutaBo. 38.

**अगुरुसंयुक्त** ( aguru–saṁyukta ) *adj.* **i** [ *f.* –ā] piled with aloe wood उदारागुरुसंयुक्ताम् … चितां कृत्वा समुच्छ्रिताम् Rāmā. (Gorresio) vi. 96. 8; **ii** mixed with aloe-wood resin धूपं चागुरुसंयुक्तं दहेद्देवस्य चाग्रतः BrahmP. 67. 24.

**अगुरुसंचय** ( aguru–sañcaya ) *m.* collection of aloe wood जगाम स वाणिज्यायै कटाहद्वीपमेकदा । भाण्डमध्ये च तस्याभून्महानगुरुसंचयः KathāSaSāg. x. 5. 3.

**अगुरुसंभव** ( aguru–sambhava ) *adj.* produced from aloe wood अग्नेः